# A-III/1/22ASYS3CCTC1/23

## तृतीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-24)

## सांख्ययोगः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. भूताद्यहङ्कारात् कः प्रवर्तते ?
2. कति तुष्टयः सन्ति ?
3. कति प्रकृतिविकृतयः सन्ति ?
4. ज्ञानेन्द्रियाणां व्यापाराः के ?
5. किं नाम आध्यात्मिकं दुःखम् ?
6. उभयात्मकम् इन्द्रियं किम् ?
7. व्यक्ताव्यक्तयोः कुत्र साधर्म्यं वर्तते ?
8. कपिलसिद्धान्ते कति गुणाः राजन्ते ?
9. अतीन्द्रियाणां प्रतीतिः केन प्रमाणेन भवति ?
10. पुरुषस्य साक्षित्वं कथं सिध्यति ?
11. सांख्ये मोक्षः कः ?
12. कीदृशी बुद्धिः सर्वं विषयमवगाहते ?
13. पञ्च भूतानां विशेषान् लिखत।

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. पुरुषबहुत्वं विवेचयत।
15. सृष्टिप्रक्रियां निरूपयत।

16. जननमरणकरणानां प्रतिनियमात् किं सिध्यतीति विवेचयत।

17. अन्तःकरणत्रयस्य व्यापारान् व्याख्यात।

18. इतरेषु दर्शनेषु सांख्यदर्शनस्य प्रभावं विवृणुत।

19. दुःखानि निरूपयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. महाभूतोत्पत्तेः प्रभावो वेदान्तदर्शने कथमिति विवेचयत।

21. पुरुषस्य बन्धमोक्षविषयं वर्णयत।

22. पुराणेषु सांख्यतत्त्वानां सारं समासेन वर्णयत।

# A-III/2/22ASYS3CCTC2/23

## तृतीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-25)

## सांख्ययोगः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. सांख्यमते वेदः पौरुषेयः उत अपौरुषेयः?
2. काः विभूतयः?
3. चित्तवृत्तयः काः सन्ति?
4. मिथ्याज्ञानं कथं जायते?
5. स्मृतिः का?
6. अभ्यासवैराग्याभ्यां किं सिध्यति?
7. अष्टाङ्गानि योगस्य कानि?
8. समाधेः भेदान् दर्शयत।
9. 'संयोगो हेयहेतुः' कथम्?
10. वेदेषु योगतत्त्वानि कानि?
11. कः योगसूत्राणां वार्त्तिककारः?
12. योगदर्शने प्रपञ्चः सत्यः उत मिथ्या?
13. ईश्वरसद्भावे किं प्रमाणमत्र योग दर्शने?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. योगशास्त्रीयमोक्षोपायान् उपनिषत्मार्गेण सह तुलनां कुरुत।

15. वैराग्यप्राप्तेः उपायान् योगशास्त्ररीत्या विवृणुत।

16. तन्त्रशास्त्रेषु योगतत्त्वानि वर्णयत।

17. रोगनाशे आधुनिककाले योगस्य उपादयेतां व्याख्यात।

18. वर्तमानकाले मनसः शान्ततासिध्यर्थं योगशास्त्रीयम् उपायं वर्णयत।

19. उपनिषत्सु प्रतिपादितं योगतत्त्वं विशदीकुरुत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. आध्यात्मिकसाधनायां योगस्य भूमिकां दर्शयत।

21. वर्तमानकाले योगस्य विराट्स्वरूपं वर्णयत।

22. योगशास्त्रस्य प्रभावः मानवजीवने कथमस्तीति विवेचयत।

# A-III/3/22ASYS3CCTC3/23

## तृतीयसत्रार्द्धः

## तृतीयपत्रम् (DSCC-26)

## सांख्ययोगः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. दिव्यभोगाः किंनिमित्ताः?
2. कः उरुक्रमः?
3. अखिलयोगविद्यामायाविचक्षणः कः?
4. सर्वभूताशयाभिज्ञः कः? तस्यार्थः कः?
5. अहङ्कारग्रन्थेः उच्छेदोपायः कः?
6. "इन्द्रियाणि तुच्छानि श्रेष्ठानि च" कथम्?
7. योगे अत्यन्तोपरतिः कुतः?
8. कवयः कम् आत्मनः पाशं विदुः?
9. कपिलमतानुसारं के साधवः?
10. कीदृशं ज्ञानं निःश्रेयसार्थाय प्राहुः?
11. प्रकृतेः त्रैविध्यं प्रदर्शयत।
12. किं नाम अनिरुद्धाख्यं मनः?
13. नभसो लक्षणं कवयः किमाहुः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. "चेतः एव बन्धस्य मुक्तेश्च कारणम्" स्पष्टीकुरुत।
15. विद्यायाः अविद्यायाः च परिणामान् विवेचयत।

16. चित्तोत्पत्तिक्रमं वर्णयत।
17. पञ्चभूतानि व्याख्येयानि।
18. देहाभिमानस्य मोक्षं प्रति प्रतिबन्धकत्वं साधयत।
19. भागवते निरूपितो योगः व्याख्यायताम्।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. विभिन्नदर्शनानुसारम् आत्मस्वरूपं विवेचयत।
21. भागवतीययोगमार्गस्य साम्प्रतिके काले उपादेयतां व्याख्यात।
22. सृष्टेः उत्पत्तिक्रमं भागवतोक्तं प्रदर्शयत।

# A-III/4/22ASYS3CCTC4/23

## तृतीयसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-27)

## सांख्ययोगः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. शरीरशुद्धये प्रधानानि सप्त साधनानि कानि?
2. किं नाम ध्यानं, तस्य द्वैविध्यं च किम्?
3. अन्तर्धौतेः किं स्वरूपम्?
4. पञ्च धन्तधौतयः काः?
5. जिह्वा-शोधनस्य मुख्यं प्रयोजनं किम्?
6. को नाम नेतियोगः?
7. बुधाः त्राटकमिति किमाहुः?
8. आसनभेदान् निर्दिशत।
9. गुप्तासनलक्षणं लिखत।
10. नमोमुद्रायाः फलं किं वर्तते?
11. जालन्धरबन्धस्य प्रयोजनं प्रदर्शयत।
12. कः महावेधः इति समाख्यातः?
13. निषिद्धाः आहाराः के?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. धौतिप्रभृति-षट्कर्माणि व्याख्यात।
15. वस्तिस्वरूपं भेदान् च विवृणुत।

16. आसनभेदान् वर्णयत।
17. प्रत्याहारः व्याख्यायताम्।
18. मुद्रायाः वैशिष्ट्यं प्रतिपादयत।
19. विहित–निषिद्ध–आहारान् व्याख्यात।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. वर्तमाने प्राणायामस्य स्वरूपं तस्य व्यापकत्वं विवेचयत।
21. सम्प्रति एकाग्रतासम्पादने योगस्य उपादेयतां निरूपयत।
22. वर्तमाने स्वास्थ्यरक्षणे योगोक्तान् उपायान् विवेचयत।